३

यजुर्वेद-सामवेद-संहितासाहित्यम्

प्रस्तावना -

अस्मिन् पाठे यजुर्वेदीयसंहितासाहित्यं सामवेदीयसंहितासाहित्यं च आलोच्यम्। यजुर्वेदः शुक्लकृष्णभेदेन द्विविधो भवति। तयोः पुनः संहिताभेदोऽपि अस्ति। अत्र तावत् आदौ यजुर्वेदसंहितायाः सामान्येन परिचयं कृत्वा माध्यन्दिनसंहिता, काण्वसंहिता, तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता, कापिष्ठलसंहिता च इत्येतेषां विभागानां विस्तरशः आलोचना करिष्यते। अनन्तरं सामवेदसंहिता आलोचयिष्यते। तत्र च सामशब्दार्थः प्रतिपादयिष्यते। तदनन्तरं कौथुमीयशाखा राणायणीयशाखा जैमिनीयशाखा चेति तिसृणां सामवेदीयशाखानाम् विस्तृता आलोचना भविष्यति। अन्ते च सामगानसामान्यपरिचयः सामविभागः च प्रदर्शयिष्यते।

उद्देश्यानि -

इमं पाठं पठित्वा भवान् -

- यजुर्वेदस्य विभागं ज्ञास्यति।
- यजुर्वेदीयसंहितानां प्रकारं ज्ञास्यति।
- माध्यन्दिनसंहिता, काण्वसंहिता, तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता, कापिष्ठलसंहिता - इत्येतासां मुख्यसंहितानां विषये ज्ञास्यति।
- साम-शब्दस्य अर्थं ज्ञास्यति।
- सामवेदीयसंहितानां प्रकाराणि अवगमिष्यति।
- कौथुमीयशाखा, राणायनीयशाखा जैमिनीयशाखा चेति तिस्रः सामवेदीयशाखाः ज्ञास्यति।
- सामगानसामान्यपरिचयं सामविभागं च ज्ञास्यति।

३.१) यजुःसंहितासाहित्यम्

ऋग्वेदसंहिता सामवेदसंहिता यजुर्वेदसंहिता अथर्ववेदसंहिता इति एतासु चतसृष्वपि संहितासु यजुःसंहिता अतीव महत्त्वपूर्णा। यजुर्वेदे सर्वविधस्य यागस्य वर्णनं विद्यते। सा च यजुःसंहिता कृष्णयजुश्शुक्लयजुर्भेदेन द्विविधा। मन्त्रब्राह्मणयोर्द्वयोरपि यत्र मिश्रीभावः कृतः स कृष्णयजुर्वेद इति नाम्ना, किञ्च यत्र मन्त्राणामेव विशुद्धतया प्रतिष्ठानं कृतम् सः शुक्लयजुर्वेदः इति विश्रुतम्।

शुक्लयजुर्वेदस्य सम्प्रति पञ्चाशीतिशाखासु केवलं चतस्त्रः तैत्तिरीय-मैत्रायणी-काठक-कापिष्ठलाख्याः शाखाः समुपलभ्यन्ते।

यजूंषि गद्यानि। अध्वर्युणा यज्ञे उपयुज्यमानाः मन्त्राः एव यजुर्वेदे सङ्कलिताः। यज्ञस्य वास्तविकं विधानमध्वर्युरेव करोति, अतोऽयं यजुर्वेदो यज्ञविधेरतिसन्निकृष्टं सम्बन्धं रक्षति। यजुःशब्दस्य व्याख्याः आपातदृष्ट्या भिन्नाः प्रतीता भवन्ति चेदपि तासु एकमेव लक्षणं प्रति सङ्केतः प्राप्यते। 'अनियताक्षरावसानो यजुः' अर्थात् यत्र अक्षराणां संख्या नियता निश्चिता वा नास्ति तद्यजुः। 'गद्यात्मको यजुस्तथा शेषे यजुः' इति कथनस्य तात्पर्यम् इदम् एवास्ति यत् गद्यात्मक-मन्त्राणामभिधानमेव 'यजुः' वर्तते इति।

वेदस्य द्वौ सम्प्रदायौ स्तः- १) ब्रह्मसम्प्रदायः, २) आदित्यसम्प्रदायः चेति। शतपथब्राह्मणानुसारेण आदित्ययजुः शुक्लयजुर्वेदनाम्ना विख्यातमस्ति, तथा च याज्ञवल्क्येन आख्यातम् - 'आदित्यानीमानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते' (श.ब्रा. १४/९/५/३३)। अतः आदित्यसम्प्रदायस्य प्रतिनिधिः शुक्लयजुर्वेदोऽस्ति। यजुर्वेदस्य शुक्लत्वकृष्णत्वयोः यो भेदः स तयोः स्वरूपमाश्रित्य। शुक्लयजुर्वेदे दर्शपौर्णमासाद्यनुष्ठानस्य कृते मन्त्राः सङ्कलिताः सन्ति। किञ्च तत्र ब्राह्मणभागः पृथक्तया निर्दिष्टः। कृष्णयजुर्वेदे तु मन्त्रैः सह तन्नियोजकानां ब्राह्मणवाक्यानां सम्मिश्रणमस्ति। मन्त्रब्राह्मणयोः एकत्र मिश्रणमेव कृष्णयजुर्वेदस्य कृष्णत्वस्य कारणमस्ति। एवञ्च मन्त्रब्राह्मणयोः पृथक्त्वं शुक्लयजुर्वेदस्य शुक्लत्वस्य कारणम् अस्ति।

३.२) विषयविवेचनम्

शुक्लयजुर्वेदीय-मन्त्रसंहिता वाजसनेयीसंहिता इति नाम्ना विख्याता। अस्य चत्वारिंशत् अध्यायाः सन्ति। तेषु अन्तिमाः पञ्चदशाध्यायाः खिलरूपेण प्रसिद्धेः अवान्तरयुगीयाः मन्यन्ते।

प्रारम्भिकयोर्द्वयोरध्यायः दर्शपौर्णमासनामकयागसम्बद्धमन्त्राणां वर्णनमस्ति। तृतीयाध्याये अग्निहोत्राय चातुर्मास्याय च यज्ञाय उपयोगिनाम् मन्त्राणां विवरणं कृतम् अस्ति। चतुर्थाध्यायात् आरभ्य अष्टमाध्यायपर्यन्तं सोमयागानां वर्णनमस्ति। अस्मिन्नेवाध्याये अग्निष्टोमस्य प्रकृतियागत्वेन नितान्तं विस्तृतविवरणम् अस्ति। अग्निष्टोमे सोमस्य उपलखण्डेन कुट्टनं कृत्वा रसक्षरणम् करणीयम्। तेन हि प्रातः, मध्याह्ने, सायंकाले चाग्नौ हवनं भवति। अस्यैव 'सवनमि'त्यभिधानमस्ति। सवनमिदं समयानुसारेण विभिन्ननाम्ना विख्यातमस्ति। दिनमात्रमेव समाप्य सवनम् 'एकाहः' इति कथ्यते। सोमयागे वाजपेययागः अन्यतमोऽस्ति। राज्ञः अभिषेककाले राजसूययज्ञो भवति। यज्ञेऽस्मिन् द्यूतक्रीडा-अस्त्रक्रीडाप्रभृतीनां राजन्योचितविभिन्नक्रियाकलापानां विधानं भवति। नवमे दशमे च अध्याये अनेन यज्ञेनैव सम्बद्धानां मन्त्राणां सङ्कलनमस्ति। तदनन्तरम् एकादशाध्यायाद् आरभ्य अष्टादशाध्यायपर्यन्तम् अग्निचयनविषये आलोचना वर्तते। किञ्च यज्ञीयहोमाग्निहेतवे वेदीनिर्माणस्य वर्णनमपि विस्तरेण कृतमस्ति। वेद्या रचना १०८०० इष्टिकाभिः भवति। इयम् विशिष्टस्थानादेव समानीता भवति।वेद्याः आकृतिः पतत्रप्रसारितः पक्षी इव भवति। ब्राह्मणमन्त्रेषु वेद्याः तथा तासाम् इष्टिकाणाम् आध्यात्मिकरूपतया व्याख्यानम् अतीव सुन्दरतया कृतमस्ति। षोडशाध्याये शतरुद्रीयहोमस्य प्रसङ्गः अस्ति। अस्मिन् अध्याये रुद्रस्य

कल्पनायाः साङ्गोपाङ्गविवेचनमस्ति। रुद्रसम्बन्धिवैदिकयज्ञेषु रुद्राध्यायः अतीव उपयोगित्वेन नितान्तं प्रसिद्धोऽस्ति। अष्टादशाध्याये वसोः धारासम्बन्धिनः मन्त्राः निर्दिष्टाः सन्ति। तदनन्तरं त्रिष्वध्यायेषु (१९-२१) सौत्रामणियज्ञस्य विधानमस्ति। अस्य यज्ञस्य विषये अस्ति एका जनश्रुतिः यत् अधिकसोमपानेन इन्द्रः रुग्णोऽभवत्। अस्य रोगस्य चिकित्सा स्ववैद्येन अनेनैव यज्ञेन कृता इति। राज्यच्युतनृपाय, पशुकाम-यजमानाय, सोमरसानुकूलतया पराङ्मुखजनाय चास्यैव यज्ञास्यानुष्ठानं विहितम्। अस्याः प्रक्रियायाः संक्षिप्तं विवरणम् ऊनविंशत्यध्यायस्य महीधरभाष्यस्य प्रारम्भे समुपलब्धमस्ति। सौत्रामणियज्ञे सोमरसेन सह सुरापानस्याऽपि विधानं वर्त्तते। तथाहि "सौत्रामण्यां सुरां पिबेत्" इति।

द्वाविंशत्यध्यायाद् आरभ्य पञ्चविंशत्यध्यायपर्यन्तम् अश्वमेधयज्ञस्य विशिष्टमन्त्राणां निर्देशोऽस्ति। अश्वमेधयज्ञस्तु सार्वभौमाधिपत्याभिलाषिसम्राजे विहितोऽस्ति। अस्य यज्ञस्य साङ्गोपाङ्गवर्णनं शतपथब्राह्मणस्य त्रयोदशकाण्डे तथा च कात्यायनश्रौतसूत्रस्य विंशत्यध्याये अस्ति। षड्विंशत्यध्यायाद् आरभ्य ऊनत्रिंशदध्यायपर्यन्तं खिलमन्त्राणां सङ्कलनमस्ति। त्रिंशदध्याये पुरुषमेधयज्ञस्य वर्णनमस्ति। यत्र चतुरशीत्यधिकशतपदार्थानां आलम्भनस्य (बलिदानस्य) निर्देशः विहितः। भारतवर्षे कदापि पुरुषमेधो नाभवत्। अयं काल्पनिकयज्ञोऽस्ति। अस्मिन्नध्याये तात्कालिकसमाजस्य अवस्थायाः, वृत्तेस्तथा कलाकौशलस्य परिचयः प्राप्यते। एकत्रिंशदध्याये प्रसिद्धपुरुषसूक्तमस्ति, यस्मिन्नृग्वेदापेक्षया षट् मन्त्रा अधिकाः सन्ति। द्वात्रिंशत् तथा त्रयस्त्रिंशदध्याये सर्वमेधस्य मन्त्रः उल्लिखितोऽस्ति। द्वात्रिंशदध्यस्यारम्भे हिरण्यगर्भसूक्तस्याऽपि कतिपयमन्त्राः समुद्धृताः सन्ति। चतुस्त्रिंशदध्यायस्य प्रारम्भे षण्मन्त्रविशिष्टा 'शिवसङ्कल्पसूक्तम्' (तन्मे मनः शिवसङ्कल्पमस्तु) नितान्तम् उपादेया अस्ति।

"सुषारथिरश्वानिव यन्मनुष्यान्
नेनीयतेऽभीशुभिर्वाजिन इव।
हृत्प्रतिष्ठं यदजिरं जविष्ठं
तन्मे मनः शिवसङ्कल्पमस्तु॥" (यजुः ३४/६)

पञ्चत्रिंशदध्याये पितृमेधयज्ञसम्बन्धिमन्त्राः सङ्कलिताः। षट्त्रिंशदध्यायाद् आरभ्य अष्टात्रिंशदध्यायपर्यन्तं प्रवर्ग्ययागस्य विस्तरशः वर्णनमस्ति। अन्तिमाध्याये ईशावास्योपनिषत् अस्ति। उपनिषत्सु लघुकाशिकेयमुपनिषद् आदिमोपनिषदस्ति, यतो हि अन्योपनिषत्संहितायाः भागो नास्ति। उपनिषद्ग्रन्थेषु अस्य ग्रन्थस्य प्राथम्यस्य इदमेव कारणमस्ति। अस्याः संहितायाः आदित्येन सह घनिष्ठसम्बन्धस्यापि सूचना अस्याः एव अन्तिममन्त्रेण प्राप्यते-

"हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।
योसावादित्ये पुरुषः सोऽसावहम्।।" इति। (ईशावा.४०/१७)

पाठगतप्रश्नाः-१

१. गद्यात्मकमन्त्राणां किमभिधानम्।
२. यजुर्वेदः कतिविधः।
३. वेदस्य कति सम्प्रदायाः।
४. कृष्णयजुर्वेदस्य तथा नामकरणे हेतुः कः।
५. शुक्लयजुर्वेदे कति अध्यायाः सन्ति।
६. अश्वमेधयज्ञविषये निर्देशः शुक्लयजुर्वेदे कुत्र प्राप्यते।

३.३) शुक्लयजुर्वेदस्य शाखा

शुक्लयजुर्वेदस्य माध्यन्दिनशाखा, काण्वशाखा चेति द्वे शाखे स्तः। प्रथमा उत्तरभारते प्राप्यते द्वितीया च महाराष्ट्रे। अनयोः शाखयोः संहिते भिन्ने सत्यौ अपि स्वल्पमेव भेदं ते धारयतः, बहुत्र च साम्यम् अस्ति। किञ्च प्राचीनकाले काण्वशाखा उत्तरभारते एवासीत्। यतः अस्याः संहितायाः एकस्मिन् मन्त्रे (११/११) कुरु-पाञ्चालदेशीयनृपतेः निर्देशः प्राप्यते (एष वः कुरवो राजा, एष पाञ्चालो राजा)। महाभारतस्य आदिपर्वानुसारेण (६३/१८) शकुन्तलायाः पालनकर्तुः पितुः कुलपतिकण्वस्य आश्रमः मालिनीनद्याः तटे आसीत्। अद्यापि इदम् स्थानम् उत्तरप्रदेशस्य 'बिजनौर'मण्डले 'मालन'नाम्ना ख्याता एका लघ्वी नदी अस्ति। अतः काण्वसंहितायाः प्राचीनसम्बन्धः उत्तरप्रदेशेन सह अङ्गीकरणे न कापि विप्रतिपत्तिः।

३.४) कृष्णयजुर्वेदस्य शाखा

कृष्णयजुर्वेदस्य सम्प्रति चतस्रः शाखाः प्राप्यन्ते -

क. तैत्तिरीयसंहिता- इयं प्रधानशाखा, अत्र सप्तखण्डाः सन्ति। ते च खण्डाः अष्टकशब्देन काण्डशब्देन च व्यवह्रियन्ते। प्रतिकाण्डं कतिपयाध्यायाः वर्तन्ते ये प्रपाठकनाम्ना ख्याताः। इमे प्रपाठकाः बहुषु अनुवाक्षु विभक्ताः सन्ति।

ख. मैत्रायणीसंहिता- इमे द्वे अपि संहिते तैत्तिरीयसंहिताम् अनुकुरुतः।

ग. काठकसंहिता- केवलं क्रमे यत्र तत्र पार्थक्यं विद्यते।

घ. कापिष्ठलसंहिता- चरणव्यूहमतानुसारेण अस्याः विषये प्रतिपादयिष्यते।

३.४.१) तैत्तिरीयसंहिता

तैत्तिरीयसंहितायाः प्रसारदेशः दक्षिणभारतेऽस्ति। आंशिकरूपेण महाराष्ट्रप्रदेशीयाः समग्ररूपेण च अन्ध्रद्रविडदेशीयाः अस्याः शाखायाः अनुयायिनः सन्ति। अस्याः संहितायाः स्वकीयाः ब्राह्मण-आरण्यक-उपनिषत्-श्रौतसूत्र-गृह्यसूत्रप्रभृतयः अक्षुण्णाः सन्ति। तैत्तिरीयसंहितायाः परिमाणमपि न्यूनं नास्ति। आचार्यसायणस्य इयं स्वकीया शाखासीत्। शुक्लयजुर्वेदे वर्णितविषयाः इव अस्याः विषयाः सन्ति। पौरोडाश-याजमान-वाजपेय-राजसूयप्रभृतिनानायागानुष्ठानानां विशदं वर्णनम् अत्राप्यस्ति। यज्ञस्य मुख्यस्वरूपस्य निष्पादकत्वेन अस्याः संहितायाः विद्वत्तापूर्णभाष्यं सर्वप्रथमम् आचार्यसायणेन रचितम्। किञ्च तस्मादपि पूर्वतरं भाष्यं भट्टभास्करमिश्रस्य (एकादशशताब्द्याः) समुपलब्धं भवति। ज्ञानयज्ञनाम्ना भाष्यमिदं विख्यातमस्ति। प्रामाणिकदृष्ट्या विद्वत्तादृष्ट्या वा कस्मादपि भाष्याद् हीनतरमिदं भाष्यं नास्ति। अधियज्ञार्थाद् अतिरिक्तः आध्यात्मिकाधिदैविकपक्षयोरपि मन्त्राणामर्थो यत्र तत्र कृतोऽस्ति।

३.४.२) मैत्रायणीसंहिता

कृष्णयजुर्वेदस्य अन्यतमा शाखा मैत्रायणी। इयं च संहिता गद्यपद्यात्मिकाऽस्ति। अस्यां संहितायां चत्वारः काण्डाः सन्ति। प्रथमकाण्डः एकादशप्रपाठकेषु विभक्तोऽस्ति। येषु क्रमशः दर्शपूर्णमास-अध्वर-आधान-पुनराधान-चातुर्मास्य वाजपेयप्रभृतीनां यज्ञानां वर्णनमस्ति। द्वितीयः काण्डः त्रयोदशप्रपाठकेषु विभक्तः अस्ति। एतेषु प्रपाठकेषु काम्य-इष्टि-राजसूय-अग्निचितिप्रभृतीनां विस्तृतं विवरणमस्ति। तृतीयकाण्डे षोडशप्रपाठकाः सन्ति। येषु अग्निचिति-अध्वरविधि-सौत्रामणी-अश्वमेधादीनां विस्तृतं वर्णनमस्ति। चतुर्थकाण्डः खिलकाण्डनाम्ना विख्यातोऽस्ति। एतेषु पूर्वनिर्दिष्टराजसूयादियज्ञानां विषये आवश्यकवस्तूनां सुमहान् सङ्ग्रहो वर्तते। समग्रसंहितायां २१४४ मन्त्राः सन्ति, येषु १७०१ ऋचः प्रतिकाण्डम् ऋग्वेदात् समुद्धृताः सन्ति। एते सर्वेऽपि मन्त्राः ऋग्वेदस्य विभिन्नमण्डलेषु समुपलब्धाः भवन्ति।

३.४.३) कठसंहिता

यजुर्वेदस्य सप्तविंशतिशाखासु कठशाखा अन्यतमा। पुराणेषु काठकजनाः मध्यप्रदेशीयनाम्ना माध्यमनाम्ना वा विख्याताः आसन्। अनेन ज्ञायते यत् ते प्राचीनकाले मध्यप्रदेशे वसन्ति स्म। पतञ्जलेः कथानुसारं कठसंहितायाः प्रसारः तथा पठन-पाठनं प्रतिग्रामम् आसीत् ('ग्रामे ग्रामे काठकं कालापकं च प्रोच्यते'- महाभाष्यम् ४/३/१०१)। अनेन अस्याः संहितायाः प्राचीनकाले विपुलप्रचारस्य बोधो भवति। अधुना अस्याः अध्येतॄणां संख्या अतीव अल्पा।

कठसंहितायां पञ्च खण्डाः सन्ति। ते च क्रमशः इठिमिका-माध्यमिका-ओरमिका-याज्यानुवाक्या-अश्वमेधाद्यनुवचननामभिः ख्याताः सन्ति। एतेषां खण्डानाम् अंशस्य नाम स्थानकमस्ति। एतानि नामानि वैदिकसाहित्येऽन्यत्र दुर्लभानि सन्ति। अस्यां संहितायां स्थानकस्य

संख्या चत्वारिंशत्, अनुवचनानां संख्या त्रयोदश, अनुवाकानां संख्या त्रयश्चत्वारिंशदधिकाष्टशतम्, मन्त्राणां संख्या एकनवत्यधिकत्रिसहस्रम्, मन्त्रब्राह्मणयोः सम्मिलिता संख्या अष्टादशसहस्रपरिमिता।

इठिमिकायाः अष्टादशस्थानकेषु पुरोडाश-अध्वर-पशुबन्ध-वाजपेय-राजसूयादियागानां विस्तृतं वर्णनमस्ति। माध्यमिकायाः द्वादशस्थानकेषु सावित्री-पञ्चचूड-स्वर्ग-दीक्षित-आयुष्यादीनां विवेचनमस्ति। ओरिमिकायाः दशस्थानकेषु पुरोडाशब्राह्मण-यजमानब्राह्मण-सत्रप्रायश्चित्ति-चातुर्मास्य-सव-सौत्रामण्यादीनां वर्णनमस्ति। अन्तिमे काण्डे त्रयोदशानुवचनानि सन्ति। अत्र दर्शपौर्णमास-अग्निष्टोम-अग्निहोत्र-आधान-काम्येष्टि-निरूढपशुबन्ध-वाजपेय-राजसूय-अग्निचयन-चातुर्मास्य-सौत्रामणी-अश्वमेधादियज्ञानां विशिष्टविधानपुरस्सरम् वर्णना अस्ति। कृष्णयजुर्वदेस्य चतसृषु संहितासु न केवलं स्वरूपतः एकरूपताऽस्ति प्रत्युत तासु वर्णितानुष्ठानेषु तथा तन्निष्पादकमन्त्रेष्वपि साम्यं वर्त्तते।

३.४.४) कापिष्ठलसंहिता

चरणव्यूहस्य मतानुसारेण चरकशाखान्तर्गते कठानां, प्राच्यकठानां कपिष्ठलकठानाञ्च उल्लेखः प्राप्यते, येन उल्लेखेन शाखासम्बद्धस्य अस्य पूर्णपरिचयो भवति। कपिष्ठलः कस्यचित् ऋषिविशेषस्य नाम आसीत्। अस्य उल्लेखम् महावैयाकरणपाणिनिमहर्षिः 'कपिष्ठलो गोत्रे' (८/३/९१) इत्येतस्मिन् सूत्रे कृतवान्। भाष्यकारेण दुर्गाचार्येणापि स्वात्मानं 'कपिष्ठलो वाशिष्ठः' इति उक्तम् ("अहञ्च कापिष्ठलो वाशिष्ठः" निरुक्तटीका ४/४)। प्रायः कस्यचित् स्थानविशेषस्य इदम् अभिधानम् आसीत्। अस्याः संहितायाः सम्पादकेन अनुमीयते यत्- कपिष्ठलग्रामस्य प्रतिनिधिः 'कैथल' इत्याख्यो ग्राम एवासीत्। ग्रामोऽयं कुरुक्षेत्रे सरस्वतीनद्याः पूर्वस्यां दिशि अवस्थितः आसीत्। अस्य ग्रामस्योल्लेखः काशिकायां तथा वराहमिहिरेण रचितायाम् बृहत्संहितायां (१४/४) प्राप्यते।

काठकसंहितातः अनेकविधं वैभिन्यं पार्थक्यञ्च अस्यां कापिष्ठलसंहितायां परिलक्ष्यते। काठकसंहितावत् मूलग्रन्थस्य समानत्वेऽपि अस्याः स्वराङ्कनपद्धतिः ऋग्वेदसदृशी। ऋग्वेद इव ग्रन्थोऽयम् अष्टकेषु अध्यायेषु च विभक्तोऽस्ति। एवम् कापिष्ठलसंहितायाम् ऋग्वेदस्यैव महान् प्रभावः परिलक्ष्यते। ग्रन्थोऽयम् अपूर्णः एवास्ति। ग्रन्थेऽस्मिन् निम्नलिखितानि अष्टकानि तथा तदन्तर्गता अध्यायाश्च सन्ति-

प्रथममष्टकम्- सम्पूर्णम्, अष्टाध्याययुतश्च।

द्वितीयमष्टकम्,+तृतीयमष्टकम्- नवमाध्यायादारभ्य चतुर्विंशति-अध्यायपर्यन्तं द्वितीयतृतीय-अष्टकद्वयम्।

चतुर्थमष्टकम्- द्वात्रिंशदध्यायं विहाय पञ्चविंशत्यध्यायादारभ्य एकत्रिंशदध्यायपर्यन्तं सर्वेऽपि अध्यायाः समुपलब्धाः सन्ति।

पञ्चममष्टकम्- त्रयस्त्रिंशदध्यायं विना द्वात्रिंशदध्यायादरभ्य अन्ये सप्त अध्यायाः समुपलब्धाः।

षष्ठमष्टकम्- त्रयश्चत्वारिंशदध्यायं विना सर्वेऽप्यध्यायाः समुपलब्धाः। अष्टचत्वारिंशदध्याये ग्रन्थोऽयं सम्पूर्णो भवति। तुलनात्मकदृष्ट्या अपूर्णो ग्रन्थोऽयमतीव महत्त्वपूर्णमस्ति।

पाठगतप्रश्नाः-२

७. शुक्लयजुर्वेदस्य कति शाखाः।

८. कृष्णयजुर्वेदस्य कति शाखाः प्राप्यन्ते।

९. माध्यन्दिनशाखा कुत्र लभ्यते।

१०. काण्वशाखा कुत्र प्राप्यते।

११. मैत्रायणीसंहितायां कति काण्डाः सन्ति।

३.५) अथ सामसंहितासाहित्यम्

चतसृष्वपि संहितासु सामसंहिता परमगौरवशालिनी वर्त्तते। 'सामानि यो वेत्ति स वेद तत्त्वम्' इत्येषा बृहद्देवतायाः उक्तिः तन्महिमानम् उच्चैः गायति। गीतायां भगवान् श्रीकृष्णः आह- 'वेदानां सामवेदोऽस्मि' इति। गानपूर्वकम् उपासनं वेदस्य अस्य उद्देश्यमस्ति। साम्प्रतम् अस्य गरीयसो वेदस्य त्रिस्रः एव शाखाः उपलभ्यन्ते। ताश्च यथाक्रमं कौथुमीया, राणायनीया, जैमिनीया च।

ऋग्वेदे अथर्ववेदे च सामवेदस्य प्रशस्ता प्रशंसा लभ्यते। ऋग्वेदे एकस्मिन् मन्त्रे खग-कुल-कलरव इव सामगायनं मधुरं भवति इति प्रोक्तम्- 'उद्गातेव शकुने साम गायसि' इति (ऋ.२/४३/२)। अथर्ववेदे वेदानां स्वरूपविषये एकत्र आम्नातं यत् जगतः नियन्तुः परमेश्वरस्य मुखस्वरूपः अस्ति अथर्ववेदः, त्वचः लोमस्वरूपः अस्ति सामवेदः, हृदयस्वरूपः अस्ति यजुर्वेदः, किञ्च प्राणस्वरूपः अस्ति ऋग्वेदः इति। तथाहि आम्नातम्-

"यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।

सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखं स्कम्भं तं ब्रूहि कतमः स्विदेव सः" इति। (अथर्ववेदः. १०/७/२०)।

अन्यस्मिन् मन्त्रे ऋग्वेदेन सह सामवेदस्याऽपि आविर्भावः उच्छिष्टादेव प्रदर्शितोऽस्ति- **'ऋचः सामानि छन्दांसि..........उच्छिष्टास्तु यज्ञिरे सर्वे' (अथ.वे. ११/७/२४)।** इतरस्मिन् मन्त्रे कर्मणः साधनभूतस्य ऋग्वेदस्य सामवेदस्य च स्तुतेः विधानमस्ति- 'ऋचं साम यजामहे यासां कर्माणि कुर्वते' (अ.वे. ७/५४/१)। एतदतिरिक्तम् सामवेदस्य विभिन्नम् अभिधानं प्राचीनवैदिकसाहित्ये समुपलब्धं भवति, येनास्य सामवेदस्य प्राचीनता असन्दिग्धतया सिद्धा भवति। ऋग्वेदे वैरूप-बृहत्-रैवत-गायत्र-भद्रादीनां साम्नाम् अभिधानम् उपलभ्यते। यजुर्वेदे रथन्तर-वैखानस-वामदेव्य-शाक्वर-रैवत-अभीवर्त्तादीनाम् उल्लेखः प्राप्यते। ऐतरेयब्राह्मणे नौधस-रौरय-यौधाजय-अग्निष्टोमीयप्रभृतीनां विशिष्टसाम्नाम् अभिधानस्य निर्देशः लभ्यते। अनेन इदं प्रतीतं भवति यत् सामगायनं प्राचीनकालादेव समायाति। ऋग्वेदस्यापि समये एतेषां विशिष्टगायनानाम् अस्तित्वं स्पष्टरूपेण सिद्धं भवति।

३.६) सामशब्दार्थः

ऋङ्मन्त्रसम्बद्धं गानमेव वस्तुतः सामशब्दस्य वाच्यम् अस्ति। सामसंहितायाः सङ्कलनम् उद्गातृनाम्ना ऋत्विजा कृतमस्ति। उद्गाता एव देवतास्तुतिपरकमन्त्रान् आवश्यकतानुसारं विविधस्वरैः गायति। अतः साम्नाम् आधारभूताः ऋङ्मन्त्राः एव भवन्ति इति निश्चितं भवति (ऋचि अध्यूढं साम- छा. उ. १/६/१)। अत्र च ऋक्साम्नोः प्रगाढमिदं पारस्परिकसम्बन्धं सूचयितुम् उभयोः मध्ये दाम्पत्यभावस्यापि कल्पना वर्तते। पतिः सन्तानोत्पादनाय पत्न्याः आह्वानं कुर्वन् कथयति- सामरूपोऽहं पतिरस्मि त्वञ्च ऋग्रूपा पत्नी असि। अहमाकाशोऽस्मि त्वञ्च पृथिवी असि। अतः आगच्छ।आवाम् मिलित्वा प्रजानामुत्पादनं कुर्वः **'अमोऽहमस्मि सा त्वम्, सामाहमस्मि ऋक् त्वम्, द्यौरहं पृथिवी त्वम्, ताविह सम्भवावा प्रजानामजनयावहै'** (बृह. उ. ६/५/२०; अ. वे. १४/२/७ ऐ.ब्रा. ८/२७)। सामशब्दस्य एका अतीव सुष्ठुः निरुक्तिः बृहदारण्यकोपनिषदि वर्त्तते- **'सा च अमश्चोति तत्साम्नः सामत्वम्'** (बृह.उ. १/३/२२)। 'सा' इति शब्दस्य अर्थो भवति ऋक् तथा 'अम' इति शब्दस्य अर्थः गान्धारादयः स्वराः। अतः सामशब्दस्य व्युत्पत्तिलभ्यार्थः भवति ऋक्सम्बद्धस्वरप्रधानगयानम्। तथाहि- 'तया सह सम्बन्धः अमो नाम स्वरः यत्र वर्त्तते तत्साम' इति। यासाम् ऋचाम् उपरि सामगानं भवति ता ऋचः वेदज्ञाः 'सामयोनि'नाम्ना जानन्ति। अत्र स्मरणीयमस्ति यत् इदं सामसंहितायाः वर्णनमस्ति। इदं तासां साम-ऋचां सङ्ग्रहमात्रमेवास्ति अर्थात् सामसंहितायां केवलं सामोपयोगिनां मन्त्राणां सङ्कलनमेवास्ति, तेषां गायनानां नास्ति यत्सामवेदस्य मुख्यं वाच्यमस्ति।

३.७) विषयविवेचनम्

सामवेदस्य द्वौ प्रधानौ भागौ स्तः:- आर्चिकः गानम् चेति। आर्चिकशब्दार्थः ऋक्-समूहः। सोऽपि द्वेधा विभज्यते- पूर्वाचिकम् उत्तरार्चिकम् चेति। पूर्वार्चिकमेव छन्दः, छन्दसी, छन्दसिका चेति त्रिभिरपि नामभिः अभिधीयते। विषयानुसारं पूर्वार्चिकम् चतुर्षु भागेषु विभज्यते- आग्नेयपर्व (अग्निसम्बन्धिनीभिः ऋग्भिः उपेतम्), ऐन्द्रपर्व (इन्द्रसम्बन्धिनीभिः ऋग्भिः युतम्), पवमानपर्व (सोमविषयकम्), आरण्यकम् चेति। पूर्वार्चिके षट् प्रपाठकाः अथवा अध्यायाः सन्ति। प्रतिप्रपाठकम् द्वौ अर्द्धौ खण्डौ वा स्तः, तथा प्रत्येकम् खण्डे पुनः 'दशति'नामकाः अंशाः विद्यन्ते। प्रत्येकं दशतिनामकखण्डे कतिपयाः ऋचः सन्ति। प्रथमाध्यायात् आरभ्य पञ्चमाध्यायपर्यन्तस्य ऋचस्तु 'सामगान'नाम्ना ख्याताः सन्ति, किञ्च षष्ठाध्यायस्य ऋचः अरण्ये एव गीयन्ते। अतोऽत्र आसाम् ऋचाम् एकत्र सङ्ग्रहोऽस्ति। अस्य अन्ते परिशिष्टरूपेण 'महानाम्नी' इत्याख्याः दश ऋचः सन्ति। अनेन प्रकारेण पूर्वार्चिके मन्त्राणां संख्या पञ्चाशदधिकषट्शतम् (६५०) अस्ति।

उत्तरार्चिकं तु अनुष्ठाननिर्देशकम्। तस्य बहवो विभागाः। दशरात्रम्, संवत्सरम्, ऐकाहम्, अहीनम्, सत्रम्, प्रायश्चित्तम्, क्षुद्रम् चेति प्रमुखाः तत्र भेदाः सन्ति। अस्मिन् उत्तरार्चिके नव प्रपाठकाः सन्ति। प्रथमपञ्चप्रपाठकेषु प्रत्येकम् प्रपाठके द्वौ भागौ स्तः, यौ प्रपाठकार्द्धनाम्ना ख्यातौ स्तः। किञ्च अन्तिमचतुर्षु प्रपाठकेषु प्रत्येकम् प्रपाठके भागत्रयम् अस्ति। अयम् भेदः राणायनीयशाखानुसारम्।

उत्तरार्चिकस्य समग्रमन्त्राणां संख्या (१२२५) पञ्चविंशत्यधिकद्वादशशतमस्ति। अतः उभयोः आर्चिकयोः मेलनेन मन्त्राणां संख्या (१८७५) पञ्चसप्तत्यधिकाष्टादशशतमस्ति।

पाठगतप्रश्नाः-३

१२. बृहद्देवतायां सामविषये किमुच्यते।

१३. श्रीकृष्णेन साममहिमानं कथं कीर्त्यते।

१४. साम्नः किमुद्देश्यम्।

१५. साम्नः कति शाखाः। के च ते।

१६. कस्मिन् मन्त्रे कर्मणः साधनभूतस्य ऋग्वेदस्य सामवेदस्य च स्तुतिर्विहिता।

१७. ऋग्वेदे केषां साम्नाम् अभिधानं प्राप्यते।

१८. ऋक्साम्नोः का तुलना।

१९. सामयोनिः कः।

२०. आर्चिकस्य शाब्दिकार्थः कः।

२१. पूर्वार्चिकं कैः नामभिः व्यवह्रियते।

२२. पवमानपर्व किंविषयकम्।

३.८) सामवेदशाखा

भागवत-विष्णु-वाय्वादिपुराणमतानुसारं वेदव्यासमहोदयः स्वशिष्याय जैमिनये सामवेदस्य शिक्षाम् अदात्। कविः जैमिनिः एव सामवेदस्य आद्याचार्यरूपेण सर्वत्र प्रसिद्धोऽस्ति। जैमिनिः स्वपुत्रं सुमन्तुम्, सुमन्तुः स्वात्मजं सुन्वान्तम्, सुन्वान् स्वसूनुं सुकर्माणं सामवेदसंहितायाः अध्ययनं कारितवान्। अस्याः संहितायाः विपुलप्रसाराय वेदाचार्यस्य सुकर्मणः महत् योगदानम् अस्ति। अस्य द्वौ पट्टशिष्यौ आस्ताम्- हिरण्यनाभकौशल्यः, पौष्यञ्जिः चेति, याभ्यां सामवेदस्य द्विविधा धारा प्रस्फुटिताऽभवत्। प्राच्या उदीच्या चेति। प्रश्नोपनिषदि (६/१) हिरण्यनाभः कौशलदेशीयराजपुत्ररूपेण चित्रितोऽस्ति। भागवतपुराणे (१२/६/७८) सामगानां परम्पराद्वयस्य उल्लेखः अस्ति- प्राच्यसामगाः उदीच्यसामगाः चेति। भौगोलिकभिन्नत्वेनैवात्र नामकरणस्य भिन्नताऽस्ति। हिरण्यनाभस्य शिष्यस्य नाम आसीत् कृतः इति। सः पौरववंशीयः राज्ञः सन्नतिमान्-महोदयस्य पुत्रः आसीत्। तेन सामसंहितायाः स्वशिष्यैः चतुर्विंशतिप्रकाराणाम् प्रवर्त्तनं कृतम्। अस्य वर्णनं मत्स्यपुराणे (४९/७५-७६), हरिवंशपुराणे (२०/४१-४४), विष्णुपुराणे (४/१९-५०), वायुपुराणे (४१/४४), ब्रह्माण्डपुराणे (३५/४९-५०) तथा भागवतपुराणे (१२६/८०) सामान्यरूपेण लभ्यते। वायुपुराणे ब्रह्माण्डपुराणे च कृत-महोदयस्य

चतुर्विंशतिशिष्याणां नामानि अपि उपलभ्यन्ते। कृतमहोदयस्य अनुयायित्वेन सामाचार्याः कार्त्तनाम्ना प्रख्याताः आसन्। यथा-

"चतुर्विंशतिधा येन प्रोक्ता वै सामसंहिताः।

स्मृतास्ते सामगाः प्राच्याः कार्त्ता नाम्नेह सामगाः॥" इति॥

अस्य कृतमहोदयस्य लोगाक्षि-माङ्गलि-कुल्य-कुसीद-कुक्षि-नाम्नाम् पञ्चशिष्याणाम् उल्लेखः श्रीमद्भागवते (१२/६/७९) प्राप्यते। पौराणिकानां मतानुसारेण सामवेदस्य सहस्रं शाखाः वर्त्तन्ते। अस्य समर्थनं पतञ्जलिनाऽपि कृतम्- 'सहस्रवर्त्मा सामवेदः' इति। मूलतो गानप्रधानोऽयं सामवेदः। जैमिनिगृह्यसूत्रादीनां (जै.गृ.१/१४) पर्यालोचनेन सामवेदस्य त्रयोदशशाखानाम् उल्लेखो लभ्यते। सामतर्पणस्य अवसरे एतेषाम् शाखानाम् आचार्याणां नामानि उच्चार्यन्ते। तथाहि 'राणायण-सात्यमुग्रि-व्यास-भागुरि-औलुण्डि-गौल्मुलवि-भानु-मानौपन्यव-काराटि-मशक-गार्ग्य-वार्षगण्यकौथुमि-शालिहोत्र-जैमिनि-त्रयोदशैतेमे सामगाचार्याः स्वस्ति कुर्वन्तु तर्पिताः।' सम्प्रति सामवेदस्य तिस्रः शाखाः उपलभ्यन्ते- कौथुमीया, राणायनीया, जैमिनीया चेति।

३.८.१) कौथुमीयशाखा

इयम् संहिता अतीव लोकप्रिया। अस्याः ताण्ड्यनामकशाखापि प्राप्यते। यस्याः विशिष्टः प्रभावः प्रसारश्च अतीतकाले आसीत्। आचार्यशङ्करः स्ववेदान्तभाष्यस्य अनेकस्थलेषु अस्य चर्चां कृतवान्। इयम् चर्चा अस्य गौरवस्य महत्त्वस्य च सूचिकास्ति। पञ्चविंशतिकाण्डात्मकः विपुलकायः ताण्ड्यब्राह्मणग्रन्थः अस्याः एव शाखायाः। सुप्रसिद्धा छान्दोग्योपनिषद् अपि अनया शाखया सह सम्बद्धा अस्ति इति भगवान् शङ्कराचार्यः स्वभाष्ये स्पष्टं लिखति। तथाहि "यथा ताण्डिनामुपनिषदि षष्ठे प्रपाठके स आत्मा" इति (शा. भा. ३/३/३६), "स आत्मा....छान्दोग्य उपनिषद्" इति (६८/७) तथा "अन्येऽपि शाखिनः ताण्डिनः शाट्यायिनः" इति (शा.भा. ३/४/२७)।

३.८.२) राणायनीयशाखा

इयम् संहिता कौथुमीयशाखातः कथञ्चिदपि भिन्ना नास्ति। मन्त्रगणनादृष्ट्या शाखाद्वयं प्रायः समानम्। केवलम् उच्चारणे यत्र कुत्रचित् पार्थक्यम् उपलभ्यते। कौथुमीयाः जनाः यत्र 'हाड' तथा 'राइ' इत्येतत् पदम् उच्चारयन्ति तत्र राणायनीयजनाः 'हाबु' तथा 'रायी' इति उच्चारयन्ति। राणायनीयेषु सात्यमुग्रि इति एका अवान्तरशाखा वर्त्तते, यस्याः उच्चारणस्य विशेषता भाषाविज्ञानदृष्ट्या नितान्तम् आलोचनीया अस्ति। आपिशलीशिक्षाकृता तथा महाभाष्यकारेण च स्पष्टतया निर्देशितं यत् सात्यमुग्रिजनाः एकारस्य उकारस्य च स्थाने ह्रस्वोच्चारणं कुर्वन्ति। तथाहि उक्तम्-

"छन्दोगानां सात्यमुग्रिराणायनीया ह्रस्वानि पठन्ति।" इति। (आपिशलीशिक्षा)

"ननु च भोश्छन्दोगानां सात्यमुग्रिराणायनीया अर्धमेकारं.......अर्धमोकारं च अधीयते। सुजाते ए अश्वसूनृते। अध्वर्वो ओ अद्रिभिः सुतम्" (महाभाष्यम्-१/१/४/४८)।

३.८.३) जैमिनीयशाखा

अस्याः शाखायाः समग्रांशाः ब्राह्मण-श्रौत-गृह्यसूत्रसंहिताः समुपलब्धाः सन्ति। जैमिनीयसंहिता देवनागरीलिप्यां लाहौरनगरात् प्रकाशिताभवत्। अस्याः मन्त्राणां संख्या १६८७ वर्त्तते। तवलकारशाखा अस्या एव अवान्तरशाखा वर्त्तते। तवलकारोऽयं जैमिनिमहोदयस्य पट्टशिष्यः आसीत्। सामगानमिदं पूर्वार्चिकेन सम्बद्धम् अस्ति। अस्य त्रयो भागाः सन्ति- आग्नेयः, ऐन्द्रः, पवमानः चेति। एतेषु आदिमस्य अन्तिमस्य च पर्वणः विशेषविभागो नास्ति, किञ्च ऐन्द्रपर्वणः चत्वारो भागाः सन्ति। सम्पूर्णग्रन्थे गानसंख्या १२२४ वर्त्तते। कौथुमीयसामसंहितातः जैमिनीयसामसंहितायाः पाठे सर्वथा भेदो नास्ति, किन्तु गानप्रकारः सर्वथा भिन्नः एवास्ति। अद्यावधि अस्याः शाखायाः केवलं प्रथमभागः एव प्रकाशितोऽस्ति। द्वितीयभागस्य तु हस्तलेखमात्रम् अस्ति।

पाठगतप्रश्नाः-४

२३. सामवेदस्य शिक्षा कः कस्मै अददात्।

२४. जैमिनेः पुत्रः कः।

२५. प्रश्नोपनिषदि कौशलदेशीयराजपुत्ररूपेण कः चित्रितोऽस्ति।

२६. कृतमहोदयस्य कति शिष्याः।

२७. राणायणीयेषु एका अवान्तरशाखा का।

२८. एकारस्योकारस्य च स्थाने ह्रस्वोच्चारणं के कुर्वन्ति।

३.९) सामगानसामान्यपरिचयः

एतान् सामयोनिमन्त्रान् आश्रित्य ऋषिभिः गान-मन्त्राणां रचना कृताऽस्ति। गानन्तु चतुर्धा भवति - १) गेयगानम् (प्रकृतिगानम्) २) आरण्यकगानम् ३) ऊहगानम् ४) ऊह्यगानम् (रहस्यगानम्)। पूर्वार्चिकस्य प्रथमपञ्चमाध्यायगतमन्त्रान् आदाय गेयगानं भवति। आरण्यकपर्वणि निर्दिष्टमन्त्रान् आदाय आरण्यकगानं भवति। ऊहगानम् ऊह्यगानम् च उत्तरार्चिके उल्लिखितमन्त्रान् आदाय प्राधान्येन भवति। विभिन्नशाखायाम् एषां मन्त्राणां संख्यापि विभिन्ना भवति। सर्वाधिकगानानि जैमिनीयशाखायाम् एव उपलब्धानि।

गानम्	कौथुमीयशाखा	जैमिनीयशाखा
गेयगानानि	११९७	१२३२

आरण्यकगानानि	२९४	२९१
ऊहगानानि	१०२६	१८०२
ऊह्यगानानि	२०५	३५६
सर्वेषां सङ्कलनम्	२७२२	३६८७

भारतीयसङ्गीतशास्त्रस्य मूलम् एतत् सामगानम् एव अस्ति। सामगानपद्धत्या रहस्यज्ञानमपि अधुना तथैव दुरूहोऽस्ति यथा भारतीयसङ्गीतशास्त्रस्य ज्ञानरहस्यमस्ति। नारदीयशिक्षानुसारेण सामवेदस्य स्वरमण्डलानि इत्थं सन्ति-

सामानि	**वेणवः (स्वराः)**
१.प्रथमः	मध्यमः। मा
२.द्वितीयः	गान्धारः। गा
३.तृतीयः	ऋषभः। रे
४.चतुर्थः	षड्जः। सा
५.पञ्चमः	निषादः। नि
६.षष्ठः	धैवतः। धा
७.सप्तमः	पञ्चमः। पा

सामगानेषु एते एव सप्ताङ्काः तत्तत्स्वराणां स्वरूपं सूचयन्ति। सामगानेषु सामयोनिमन्त्राणाम् परिवर्तने कृते सति अनेकविधानि सङ्गीतानुकूलपरिवर्त्तनानि भवन्ति। एतानि परिवर्त्तनानि च सामविकाराः कथ्यन्ते। सामविकारास्तु षट्संख्यकाः भवन्ति।

१.विकारः- शब्दस्य परिवर्त्तनम्। 'अग्नेः' इत्येतत्पदस्थाने 'आग्नायि' इति पदम्।

२.विश्लेषणम्- एकपदस्य पृथक्करणम्। यथा 'तये' इत्येतत्पदस्थाने 'तोयितीया २यि' इति।

३.विकर्षणम्- एकस्वरस्य दीर्घकालपर्यन्तं विभिन्नोच्चारणम्। यथा 'ये' इति पदस्य 'या २ ३ यि' इति उच्चारणम्।

४.अभ्यासः- कस्यापि पदस्य भृशम् उच्चारणम् (पौनःपुन्येन)। यथा- 'तोयायि' पदस्य वारद्वयमुच्चारणम्।

५.विरामः- सौकर्य्याय कस्यापि पदस्य मध्ये विरामः। यथा- 'गृणानि हव्यदातये' इत्यत्र हकारोपरि विरामः।

६.स्तोमः- 'औहोवा' 'हाउवा' इत्यादिगानानुकूलपदानि। एते विकाराः भाषाशास्त्रस्य दृष्ट्याऽपि नितान्तं मननीयाः सन्ति।

३.१०) सामविभागः

सामगानस्य पद्धतिः अतीव कठिना। तस्य यथार्थज्ञानाय सूक्ष्माध्ययनम् अपेक्षितम् अस्ति। सामान्यतया सामगानस्य पञ्च विभागाः भवन्ति।

१) प्रस्तावः- मन्त्रस्य प्रारम्भिकभागोऽयं भवति। 'हुँ'-शब्दात् अस्य प्रारम्भो भवति। प्रस्तोता (ऋत्विक्) अस्य गानं करोति।

२) उद्गीथः- साम्नः प्रधानः (ऋत्विक्) उद्गाता एनं गायति। अस्यारम्भः 'ॐ'-शब्दात् भवति।

३) प्रतीहारः- प्रतीहारशब्दस्य अर्थः सङ्कलनकर्त्ता, प्रतिहर्त्तानामकः ऋत्विक् एनं गायति।

४) उपद्रवः- यत् उद्गाता गायति तदेव उपद्रवः।

५) निधनः- प्रस्तोता-उद्गाता-प्रतिहर्त्ता इत्येते त्रयो मिलित्वैव अस्य गानं कुर्वन्ति। उदाहरणार्थम् सामवेदस्य प्रथमोऽयं मन्त्रः-

'अग्न आयाहि वीतये गृणानो हव्यदातये। निहोता सत्सि वर्हिषि।' इति।

अस्य मन्त्रस्योपरि यस्य साम्नः गानं भविष्यति तस्य निम्नलिखितानि पञ्च अङ्गानि भवन्ति-

१) हुँ ओग्नाई (प्रस्तावः)।

२) ओम् आयाहि वीतये गृणानो हव्यदातये (उद्गीथः)।

३) नि होता सत्सि वर्हिषि ओम् (प्रतिहारः)। अस्य प्रतिहारस्याऽपि द्वौ भेदौ स्तः।

४) नि होता सत्सिव (उपद्रवः)।

५) र्हिषि ओम् (निधनः)।

अस्य साम्नः यदा त्रिवारम् गानं भवति तदा स स्तोमः कथ्यते। सामगायनाय कस्यचित् स्वरस्य विकारः परिवर्तनम् च करणीयम् भवति। यथा पूर्वमन्त्रस्य 'अग्न' इति पदस्य गायने परिवर्त्तितरूपं- 'ओग्नाई' इति भवति। गायने स्वरपूर्त्यर्थं यदा कदापि निरर्थकं पदं सङ्कलितं भवति। यथा- औ, हौ, वा, हा इत्यादि। एतेः स्तोमाः भवन्ति। छान्दोग्योपनिषदनुसारेण सप्तविधं साम भवति। यथा- १) हिङ्कारः, २) प्रस्तावः, ३) आदिः, ३) उद्गीथः, ४) प्रतिहारः, ६) उपद्रवः, ७) निधनः चेति। उपरि निर्दिष्टानां पञ्चविधसाम्नाम् अवान्तरभेदकरणेन सप्तविधसाम्नामुत्पत्तिर्भवति।

पाठगतप्रश्नाः-५

२९. चतुर्विधं गानं किं किं।
३०. कः विकारः।
३१. किं विश्लेषणम्।
३२. किं विकर्षणम्।
३३. कः अभ्यासः।
३४. कः स्तोमः।
३५. कः प्रस्तावः।
३६. कः उपद्रवः।

पाठसारः

अस्मिन् पाठे यजुर्वेदसामवेदसंहितासाहित्यम् आलोचितम्। शुक्लकृष्णभेदेन द्विविधोऽपि यजुर्वेदः अत्र आलोचितः। तयोः पुनः संहिताभेदोऽपि प्रदर्शितः। अत्र तावत् आदौ यजुर्वेदसंहितायाः सामान्येन परिचयं कारयित्वा काण्वसंहिता तैत्तिरीयसंहिता मैत्रायणीसंहिता कठसंहिता कापिष्ठलसंहिता च इत्येताः मुख्याः संहिताः अत्र विस्तरशः आलोचिताः। अनन्तरम् सामवेदसंहिता व्याख्याता। किञ्च सामशब्दार्थोऽपि प्रतिपादितः। तदनन्तरम् कौथुमीयशाखा राणायनीयशाखा जैमिनीयशाखा चेति तिस्रः सामवेदीयशाखाः व्याख्याताः। अन्ते च सामगानसामान्यपरिचयः सामविभागः च प्रदर्शितः।

पाठान्तप्रश्नाः

१. काण्वसंहिताविषये टिप्पणी लेख्या।
२. तैत्तिरीयसंहिताविषये लघुप्रबन्धो लेख्यः।
३. मैत्रायणीसंहिताविषये टिप्पणी लेख्या।
४. कापिष्ठलसंहिताविषये लघुप्रबन्धो लेख्यः।
५. सामशब्दार्थः विस्तरशः लेख्यः।
६. कौथुमीयशाखाविषये टिप्पणी लेख्या।
७. राणायनीयशाखाविषये लघुप्रबन्धो लेख्यः।
८. जैमिनीयशाखाविषये टिप्पणी लेख्या।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. यजुः।

२. द्विविधः।

३. १) ब्रह्मसम्प्रदायः, २) आदित्यसम्प्रदायः चेति द्वौ सम्प्रदायौ।

४. मन्त्रब्राह्मणयोर्भागस्य एकत्र मिश्रणमेव कृष्णयजुर्वेदस्य कृष्णत्वस्य कारणमस्ति।

५. चत्वारिंशत्।

६. द्वाविंशत्यध्यायाद् आरभ्य पञ्चविंशत्यध्यायपर्यन्तम् अश्वमेधयज्ञस्य विशिष्टमन्त्राणां निर्देशोऽस्ति।

उत्तराणि-२

७. शुक्लयजुर्वेदस्य माध्यन्दिनशाखा, काण्वशाखा चेति द्वे शाखे।

८. उत्तरभारते प्राप्यते।

९. काण्वशाखा महाराष्ट्रे।

१०. कृष्णयजुर्वेदस्य सम्प्रति चतस्रः शाखाः प्राप्यन्ते।

११. चत्वारः काण्डाः सन्ति।

उत्तराणि-३

१२. "सामानि यो वेत्ति स वेद तत्त्वम्" इति।

१३. "वेदानां सामवेदोऽस्मि" इति।

१४. गानपूर्वम् परमात्मोपासनम्।

१५. तिस्रः। कौथुमीया,

१६. राणायनीया, जैमिनीया च।

१७. "ऋचं साम यजामहे याभ्यां कर्माणि कृण्वते" इति (अथर्ववेदः ७/५४/१)।

१८. ऋग्वेदे वैरूप-बृहत्-रैवत-गायत्र-भद्रादीनां साम्नानाम् अभिधानं लभ्यते।

१९. सामरूपोऽहं पतिरस्मि त्वञ्च ऋग्रूपा पत्नी असि।

२०. यासामृचामुपरि सामगानं भवति ता ऋचः वेदज्ञाः 'सामयोनिः' नाम्ना अभिधीयते

२१. ऋक्समूहः।

२२. छन्दः, छन्दसी, छन्दसिका चेति।

२३. सोमविषयकम्।

उत्तराणि-४

२४. वेदव्यासमहोदयः स्वशिष्याय जैमिनये।

२५. सुमन्तुः।

२६. हिरण्यनाभः।

२७. २४।

२८. सात्यमुग्रिः।

२९. सात्यमुग्रिजनाः।

उत्तराणि-५

३०. १) गेयगानम् (प्रकृतिगानम्), २) आरण्यकगानम् ३) ऊहगानम्, ४) ऊह्यगानं (रहस्यगानम्)।

३१. शब्दस्य परिवर्त्तनम्। 'अग्नेः' इत्येतत्पदस्थाने 'आग्नायि' इति पदम्।

३२. एकपदस्य पृथक्करणम्। यथा 'तये' इत्येतत्पदस्थाने 'तोयितीया २यि' इति।

३३. एकस्वरस्य दीर्घकालपर्यन्तं विभिन्नोच्चारणम्। यथा 'ये' इति पदस्य 'या २ ३ यि' इत्युच्चारणम्।

३४. कस्यापि पदस्य भृशमुच्चारणम् (पौनःपुन्येन)। यथा- 'तोयारि' पदस्य द्विवारम् उच्चारणम्।

३५. सौकर्य्याय कस्यापि पदस्य मध्ये विरामः। यथा- 'गृणानि हव्यदातये' इत्यस्मिन् पदे हकारस्योपरि विरामः।

३६. मन्त्रस्य प्रारम्भिकभागः प्रस्तावः।

३७. यत् उद्गाता गायति तदेव उपद्रवः।

।।इति तृतीयः पाठः।।